# अष्टमः पाठः

# त्रिवर्णः ध्वजः

*(केचन बालकाः काश्चन बालिकाश्च स्वतन्त्रता-दिवसस्य ध्वजारोहणसमारोहे सोत्साहं गच्छन्तः परस्परं संलपन्ति।)*

**देवेशः** – अद्य स्वतन्त्रता-दिवसः। अस्माकं विद्यालयस्य प्राचार्यः ध्वजारोहणं करिष्यति। छात्राश्च सांस्कृतिककार्यक्रमान् प्रस्तोष्यन्ति। अन्ते च मोदकानि मिलिष्यन्ति।



**डेविडः** – शुचे! जानासि त्वम्? अस्माकं ध्वजस्य किं नाम?

**शुचिः** – अरे! कः एतादृशः भारतीयः यः अस्य ध्वजस्य विषये न जानाति? अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

**सलीमः** – रुचे! अस्य नाम त्रिवर्णः कथम्?

**रुचिः** – अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि?

**सलीमः** – अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः।

**देवेशः** – अस्माकं ध्वजे एते त्रयः एव वर्णाः कथं गृहीताः?

**सलीमः** – एतेषां त्रयाणां वर्णानाम् अत्र विशेषः अभिप्रायः।

**देवेशः** – कः विशेषः?

**सलीमः** – शृणु, केशरवर्णः शौर्यस्य, श्वेतः शान्तेः, हरितश्च समृद्धेः सूचकाः सन्ति। स्वयं च अयं ध्वजः अनेकत्वे एकत्वस्य द्योतकः।

**शुचिः** – किम् एतासां पट्टिकानाम् अन्यदपि महत्त्वम्?

**डेविडः** – आम्! कथं न? ध्वजस्य उपरि स्थिता केशरपट्टिका अग्निशिखा इव ऊर्जस्वितायाः उत्साहस्य च सूचिका। मध्ये स्थिता श्वेतपट्टिका सात्त्विकतायाः निर्मलतायाः च द्योतिका। अधः स्थिता हरितपट्टिका समृद्धेः प्रगतेश्च सङ्केतिका।

**तेजिन्दरः** – शुचे! ध्वजस्य मध्ये स्थितस्य चक्रस्य किमपि महत्त्वम् अस्ति?

**शुचिः** – अथ किम् इदम् अशोकचक्रं सत्यस्य, धर्मस्य अहिंसायाश्च द्योतकम्।

**प्रणवः** – किं न जानासि? स्वतन्त्रतायाः आन्दोलने अस्य ध्वजस्य महती भूमिका आसीत्।

**शुचिः** – का सा ध्वजस्य भूमिका?

**देवेशः** – एनं ध्वजम् आश्रित्य एव स्वतन्त्रतायाः आन्दोलनम् अभवत्।

**डेविडः** – देशस्य स्वतन्त्रतायै लक्ष्मीबाई, महात्मागान्धी, पं. जवाहरलालनेहरू, सुभाषचन्द्रबोसः, आजादः चन्द्रशेखरः, भगतसिंहः, सरोजिनी नायडू, अरुणा आसफ अली इत्यादयः आजीवनं संघर्षम् अकुर्वन्। लक्षाधिकाः च जनाः स्वान् प्राणान् अपि अत्यजन्।


**तेजिन्दरः** – अस्माकं त्रिवर्णः ध्वजः स्वाभिमानस्य प्रतीकः। सर्वैः अपि भारतीयैः अस्य सम्मानः करणीयः। अतः अस्माकं सङ्कल्पः स्यात् यत् अस्य राष्ट्रध्वजस्य सम्मानरक्षार्थं वयं सर्वे स्व-स्व-कर्तव्ये तत्पराः भवेम।

जयतु त्रिवर्णः ध्वजः, जयतु भारतम्।

## शब्दार्थाः

| | | |
|---|---|---|
| **त्रिवर्णः ध्वजः** | – | तीन रंगों वाला झंडा (तिरंगा झंडा) |
| **संलपन्ति** | – | वार्तालाप करते हैं/करती हैं |
| **प्रस्तोष्यन्ति** | – | प्रस्तुत करते हैं/करती हैं |
| **मोदकानि** | – | लड्डू |
| **शौर्यस्य** | – | वीरता का/के/की |
| **ऊर्जस्वितायाः** | – | ऊर्जा की |
| **आश्रित्य** | – | सहारा लेकर |
| **लक्षाधिकाः** | – | लाखों से अधिक |

## अभ्यासः



1. **शुद्धकथनस्य समक्षम् 'आम्' अशुद्धकथनस्य समक्षं 'न' इति लिखत-**

(क) अस्माकं राष्ट्रस्य ध्वजे त्रयः वर्णाः सन्ति। [ ]

(ख) ध्वजे हरितवर्णः शान्तेः प्रतीकः अस्ति। [ ]

(ग) ध्वजे केशरवर्णः शक्त्याः सूचकः अस्ति। [ ]

(घ) स्वतन्त्रतायाः आन्दोलने लक्षाधिकाः जनाः स्वप्राणान् अत्यजन्। [ ]

(ङ) अस्माकं ध्वजः अनेकत्वे एकत्वस्य सूचकः। [ ]

**2. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत-**

| पदानि | विभक्तिः | वचनम् |
|---|---|---|
| यथा- | त्रयाणाम् | षष्ठी बहुवचनम् |
| समृद्धेः | .................. | .................. |
| वर्णानाम् | .................. | .................. |
| उत्साहस्य | .................. | .................. |
| नागरिकैः | .................. | .................. |
| पट्टिकानाम् | .................. | .................. |
| प्राणानाम् | .................. | .................. |

**3. एकपदेन उत्तरत-**

(क) अस्माकं ध्वजे कति वर्णाः सन्ति?

(ख) त्रिवर्णे ध्वजे शक्त्याः सूचकः कः वर्णः?

(ग) अशोकचक्रं कस्य द्योतकम् अस्ति?

(घ) त्रिवर्णः ध्वजः कस्य प्रतीकः?

**4. एकवाक्येन उत्तरत-**

(क) अस्माकं ध्वजस्य श्वेतवर्णः कस्य सूचकः अस्ति?

(ख) स्वतन्त्रतायाः आन्दोलने कस्य महती भूमिका आसीत्?

(ग) अस्माभिः कस्य मानसम्मानरक्षा करणीया?

(घ) ध्वजस्य श्वेतपट्टिका कस्याः सूचिका अस्ति?

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) अस्माकं <u>त्रिवर्णध्वजः</u> विश्वविजयी भवेत्।

(ख) स्वधर्मात् <u>प्रमादं</u> वयं न कुर्याम।

(ग) एतत् सर्वम् अस्माकं नेतृणां <u>सद्बुद्धेः</u> सत्फलम्।

(घ) <u>शत्रूणां</u> समक्षं विजयः सुनिश्चितः भवेत्।

**6. उदाहरणानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयत-**

| | शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा- | पट्टिका | षष्ठी | पट्टिकायाः | पट्टिकयोः | पट्टिकानाम् |
| | अग्निशिखा | सप्तमी | अग्निशिखायाम् | ................. | ................. |
| | ऊर्जा | चतुर्थी | ................. | ऊर्जाभ्याम् | ................. |
| | अहिंसा | द्वितीया | अहिंसाम् | ................. | ................. |
| | सफलता | पञ्चमी | ................. | सफलतयोः | ................. |
| | सूचिका | तृतीया | सूचिकया | ................. | ................. |

**7. समुचितमेलनं कृत्वा लिखत-**

| क | ख |
|---|---|
| केशरवर्णः | ऊर्जस्वितायाः उत्साहस्य च सूचिका |
| अशोकचक्रम् | समृद्धेः सूचकः |
| श्वेतवर्णः | सात्त्विकतायाः निर्मलतायाः च सूचिका |
| श्वेतपट्टिका | सत्यस्य, धर्मस्य अहिंसायाश्च द्योतकम् |
| हरितवर्णः | शौर्यस्य सूचकः |
| केशरपट्टिका | समृद्धेः गतेः च संकेतिका |
| हरितपट्टिका | शान्तेः सूचकः |